

# हनुमत पंचरत्न स्तोत्र

वीताखिल-विषयेच्छं जातानन्दाश्र पुलकमत्यच्छम्।
सीतापति दूताद्यं वातात्मजमद्य भावये हृद्यम् ॥१॥

तरुणारुण मुख-कमलं करुणा-रसपूर-पूरितापाङ्गम्।
सञ्जीवनमाशासे मञ्जुल-महिमानमञ्जना-भाग्यम ॥२॥

शम्बरवैरि-शरातिगमम्बुजदल-विपुल-लोचनोदारम्।
कम्बुगलमनिलदिष्टम् बिम्ब-ज्वलितोष्ठमेकमवलम्बे ॥३॥

हिंदीपथ.कॉम – HindiPath.com

दूरीकृत-सीतार्तिः प्रकटीकृत-रामवैभव-स्फूर्ति।
दारित-दशमुख-कीर्तिः पुरतो मम भातु हनुमतो मूर्तिः ॥४॥

वानर-निकराध्यक्षं दानवकुल-कुमुद-रविकर-सदृशम्।
दीन-जनावन-दीक्षं पवन तपः पाकपुञ्जमद्राक्षम् ॥५॥

एतत्-पवन-सुतस्य स्तोत्रं यः पठति पञ्चरत्नाख्यम्।
चिरमिह-निखिलान् भोगान् भुङ्क्त्वा श्रीराम-भक्ति-भाग्-भवति ॥ ६॥

॥ इति श्रीमच्छंकर-भगवतः कृतौ श्री हनुमत पञ्चरत्नं स्तोत्र संपूर्णम् ॥

हिन्दीपथ.कॉम